# ॥ શ્રીબાલાધ્યાનમ્ ॥

.. shrIbAlAdhyAnam ..

sanskritdocuments.org

August 20, 2017

.. shrIbAlAdhyAnam ..

॥ શ્રીબાલાધ્યાનમ્ ॥

# Sanskrit Document Information

Text title : bAlAdhyAnam

File name : bAlAdhyAnam.itx

Category : dhyAnam, devii

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Shree Devi Kumar

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Acknowledge-Permission: Mahaperiaval Trust

Latest update : July 2, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

## ॥ શ્રીબાલાધ્યાનમ્ ॥

રક્તામ્બરાં ચન્દ્રકલાવતંસાં સમુદ્યદાદિત્યનિભાં ત્રિનેત્રામ્ ।
વિદ્યાક્ષમાલાભયદાનહસ્તાં ધ્યાયામિ બાલામરુણામ્બુજસ્થામ્ ॥

પાશાઙ્કુશૌ પુસ્તકમક્ષસૂત્રં કરૈર્દધાના સકલામરાર્ચ્યા ।
રક્તા ત્રિનેત્રા શશિશેખરેયં ધ્યેયાઽખિલર્દ્ધ્યૈ ત્રિપુરાઽત્ર બાલા ॥

માતુલિઙ્ગપયોજન્મહસ્તાં કનકસન્નિભામ્ ।
પદ્માસનગતાં બાલાં લક્ષ્મીપ્રાપ્ત્યૈ વિચિન્તયે ॥

વરપીયૂષકલશપુસ્તકાભીતિધારિણીમ્ ।
સુધાં સ્રવન્તીં જ્ઞાનાપ્ત્યૈ બ્રહ્મરન્ધ્રે વિચિન્તયે ॥

શુક્લામ્બરાં શશાઙ્કાભાં રોગનાશે ભજે શિવામ્ ।
સૃણિપાશધરાં દેવીં રત્નાલઙ્કારભૂષિતામ્ ।
પ્રસન્નામરુણાં વન્દે વશીકરણસિદ્ધિદામ્ ॥

વાગ્બીજમૂર્તિધ્યાનમ્ -
વિદ્યાક્ષમાલાશુકપાલમુદ્રારાજત્કરાં કુન્દસમાનકાન્તિમ્ ।
મુક્તાફલાલઙ્કૃતિશોભિતાઙ્ગીં બાલાં ભજે વાઙ્મયસિદ્ધિહેતોઃ ॥

કામબીજમૂર્તિધ્યાનમ્ -
ભજે કલ્પવૃક્ષાધ ઉદ્દીપ્તરત્નાસને સન્નિષણ્ણાં મદાઘૂર્ણિતાક્ષીમ્ ।
કરૈર્બીજપૂરં કપાલેષુચાપં સપાશાઙ્કુશં રક્તવર્ણાં દધાનામ્ ॥

શક્તિબીજમૂર્તિધ્યાનમ્ -
વ્યાખ્યાનમુદ્રામૃતકુમ્ભવિદ્યામક્ષસ્રજં સન્દધતીં કરાગ્રૈઃ ।
ચિદ્રૂપિણીં શારદચન્દ્રકાન્તિં બાલાં ભજે મૌક્તિકભૂષિતાઙ્ગીમ્ ॥

ઇતિ શ્રીબાલાધ્યાનમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIbAlAdhyAnam ..

Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTEX 0.99996

on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*